# विद्या भवन बालिका विद्यापीठ

## शक्ति उत्थान आश्रम लखीसराय

**विषय संस्कृत        दिनांक 15-07-2021**

**वर्ग- सप्तम शिक्षक राजेश कुमार पाण्डेय**

**एन॰ सी॰ ई॰ आर॰ टी॰ पर आधारित**

## अभ्यास-प्रश्नपत्रम् (Model Test Paper)

### खण्डः 'क' (अपठित-अवबोधनम्)

1. **गद्यांशं पठित्वा प्रश्नान् उत्तरत–**

गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए–

*Read the passage and answer the questions.*

ग्रीष्म-ऋतौ मनुष्याः, पशवः पक्षिणः च सर्वे अपि जीवाः अतितीक्ष्णतापेन व्याकुलाः जायन्ते। सूर्यस्य तीव्रैः किरणैः पृथ्वी शुष्का भवति, सरांसि शुष्यन्ति, पादपाः लताः च हरित-पत्र-विहीनाः जायन्ते। वन्यजन्तवः छाया-अभावे जलाशयानां जलाभावे च व्याकुलाः इतस्ततः परिभ्रमन्ति। ते कुत्र अपि आश्रयं न आप्नुवन्ति। खगाः स्वनीडेषु एव तिष्ठन्ति।

I. एकपदेन उत्तरत–

(i) का शुष्का भवति?

(ii) के व्याकुलाः भूत्वा परिभ्रमन्ति?

II. पूर्णवाक्येन उत्तरत–

(i) के स्वनीडेषु एव तिष्ठन्ति?

(ii) सूर्यस्य तीव्रैः किरणैः किं भवति?

**III. निर्देशानुसारम् उत्तरत–**

(*i*) 'आप्नुवन्ति' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(क) ते (ख) आश्रयम्

(ग) जीवाः (घ) पादपाः

(*ii*) 'पृथ्वी' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(क) तीव्रैः (ख) भवति

(ग) शुष्का (घ) लता

(*iii*) 'सरोवराणाम्' इति अर्थे किं पदम् अत्र प्रयुक्तम्?

(क) जलाशयः (ख) जलाशयानाम्

(ग) जलाशयाः (घ) सरांसि

(*iv*) 'खगाः नीडेषु एव वसन्ति।' अस्मिन् वाक्ये किम् अव्ययपदम् प्रयुक्तम्?

(क) खगाः (ख) नीडेषु

(ग) एव (घ) वसन्ति

**IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।** ..............................